Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :10.16(2026); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:15, Issue:1(3), January 2026
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

# मालतीमाधवे प्रकरणलक्षणसमन्वयः

Y.BUJJI,Lec.in Sanskrit
P.R.Govt.college (A),
Kakinada,

अथ महाकविना भवभूतिना विरचिते रूपकत्रये मालतीमाधवम् अन्यतमास्ते । यथा कविकुलगुरुणा माहाकविकालिदासेन विक्रमोर्वशीय – मालविकाग्निमित्र अभिज्ञान शाकुन्तलाख्यानि त्रीणि रूपकाणि प्रणीतानि विद्यन्ते तथा भवभूतिमहाकविना च महावीरचरित –उत्तररामचरित –मालतीमाधवसंज्ञकानि त्रीणि रूपकाणि रचितानि । एवं श्रीहर्षदेवेन च नागानन्द – प्रियदर्शिका – रत्नावलीति त्रीणि दृश्यकाव्यान्यलिखितानि समुल्लसन्ति ।

इदानीं मालतीमाधवाख्ये रूपकविशेषे प्रकरणलक्षणसमन्वयः प्रदर्श्यते । आदौ नान्दीतः लक्षणसङ्गतिः प्रारभ्यते -

नान्दीपदस्य व्युत्पत्तिः -

नन्दयति आनन्दयति सभ्यान् इति नान्दी ,

नन्दन्ति अनया इति नान्दी ,

न्दन्ति देवाः अस्यां प्रयुक्तायाम् इति नान्दी इति नान्द्याः नैकविधा व्युत्पत्तिः प्रदर्शिता व्याख्यातृभिः । रङ्गस्थलाधिष्ठानदेवताः यस्याः प्रयोगेन नन्दन्ति ;सा नान्दीति व्यपदिश्यते । अस्मिन्नवसरे भरतमुनेः वचनं संस्मरणीयम् -

"पूर्वं कृता मया नान्दी आशीर्वचनसंयुता ।
अष्टाङ्गपदसंयुक्ता प्रशस्ता वेदसम्मता ॥ " इति ।

अपि च -

" सूत्रधारः पाठेनान्दीं मध्यमं स्वरमाश्रितः ।
नान्दीपदैः द्वादशाभि:अष्टभिर्वाप्यलंकृता ॥
देव – द्विज –नृपादीनामाशीर्वादपरायणा ।
नन्दन्ति देवता यस्मात् सा नान्दीति संज्ञिता ॥ इति

नान्द्याः लक्षणं निर्दिष्टं नाट्यशास्त्रे ।

अपि च साहित्यदर्पणाकारः विश्वनाथ कविराजः भरतस्य मतमेवम् उट्टङ्कयति -

" आशीर्वचनसंयुक्ता स्तुतिर्यस्मात् प्रयुज्यते ।
देव – द्विज –नृपादीनां तस्मान्नान्दीति संज्ञिता ॥
माङ्गल्य शङ्खचक्राब्जकोककैरवशंसिनी ।
पदैर्युक्ता द्वादशभिरष्टाभिर्वा पदैर्युक्ता ॥ " इति ।

इदानीं मालतीमाधवप्रकरणे भवभूतिमहाकविना ग्रथिता नान्दी परिशील्यते -

" चूडापीडकपालसङ्कुलगलन्मन्दाकिनीवारयो
विद्युत्प्रायललाटलोचनशिखिज्वालाविमिश्रत्विषः ।
पान्तु त्वामकठोरकेतकशिखासन्दिग्धमुग्धेन्दवो
भूतिशस्य भुजङ्गवल्लिवलयस्त्रङ्नद्धजूटा जटाः ॥ इति ।

गङ्गासलिलपरिपूताः ललाटतलात् विनिर्गतानलज्वालाः , सर्पमालानिबद्धमूलाः ,शिवस्य मस्तके विराजमानं खण्डशशाङ्कं पश्यतां केतकीकुसुमशिखेति संशयं प्राप्तवतां शिवाजटाः युष्मान्

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :10.16(2026); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:15, Issue:1(3), January 2026
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

अध्येतृन् अध्यापकांश्च रक्षन्तु इति भावः ।

सानन्दं नान्दिहस्ताहतमुरजरवाहूतकौमारबर्हि
त्रासान्नासाग्ररन्ध्रं विशति फणिपतौ भोगसङ्कोचभाजि ।
गण्डोड्डीनालिमालामुखरितककुभस्ताण्डे शूलपाणे
र्वैनाक्यश्चिरं वो वदनविधुतयः पान्तु चीत्कारवत्यः । इति ।

नटराजः परमशिवः सोल्लासं तान्डवकारणसमये नान्दी सहर्षं मृदङ्गं वादयति । तं मृदङ्गध्वनिं निशम्य मेघगर्जन भ्रान्तिं प्राप्य कुमारस्वानिनः वाहनं मयूरः समागतः । विनायकस्य कटिमाश्रित्य तिष्ठन् वासुकिः तदीयनासारन्ध्रं प्रविष्टः । विनायकस्य कपोलयोः झङ्कारनादं कुर्वन्तः भ्रमराः दृष्टाः । तान् भ्रमरान् चीत्कारपुरस्सरं पश्यन्तः विनायक मुखप्रकम्पनविशेषाः पठितृन् पाठकांश्च रक्षन्तु इति भावः । इह विनायकस्य विघ्नविनाशकत्वात् तन्मुखविधूननानि प्रत्यूहनिवर्तकानीति भावः ।

अत्र आशीर्वचनरूपा अष्टपदा नान्दी सम्प्रयुक्ता महाकविना भवभूतिना । “मुग्धेन्दवः ” इत्यत्र इन्दु पदनिर्देशात् नीलीनान्दी इति व्यवह्रीयते । प्रथमपद्ये परमशिवस्य जटाजूटवर्णनाया जटाकृतिः प्रशान्तस्थिते प्रतीकम् । अतः कथानायकः धीरशान्तः इति व्यङ्ग्यमर्यादया ज्ञायते । इत्थं नान्दीलक्षणसमन्वयः सुसम्पन्नः ।

इदानीं दशरूपके निर्दिष्टानि प्रकरणलक्ष्णानि प्रस्तूयन्ते -

“ अथ प्रकरणे वृत्तमुत्पाद्यं लोकसंश्रयम् ।
अमात्यविप्र वणिजामेकं कुर्याच्च नायकम् ॥
धीरप्रशान्तं सापायं धर्मकामार्थतत्परम् ।
शेषं नाटकवत् सन्धिप्रवेशकरसादिकम् ॥
नायिका तु द्विधा नेतुः कुलस्त्री गणिका तथा ।
क्वचिदेकैव कुलजा ,वेश्या क्वापि द्वयं क्वचित् ।
कुलजाभ्यन्तरा,बाह्या वेश्या ,नातिक्रमोऽनयः ।
आभिः प्रकरणम् त्रेधा,सङ्कीर्णं धूर्तसङ्कुलम् ॥ ” इति ।

“ वस्तु –नेता- रसस्तेषां –भेदकः ।”

इति दशरूपकगतसिद्धान्तानुसारं प्रकरणलक्षण समन्वयः प्रदर्श्यते आदौ वस्तु निरूप्यते -

“ प्रकरणे वृत्तमुत्पाद्यं लोकसंश्रयम् । ”

इति कथनेन कविबुद्धिविरचितमितिवृत्तम् ;लोकसंश्रयम् अर्थात् अनुदात्तम् ।

इतिवृत्तं तु यस्यकस्यापि रूपकविशेषस्य शरीरस्थानीयं भवति ।

“ वस्तु च द्विधा ” इति ।

“ तत्राधिकारिकं मुख्यमङ्गं प्रासङ्गिकं विदुः । ”इति । प्रकृते मालतीमाधवप्रकरणे नायकस्य माधवस्य सम्बन्धि इतिवृत्तम् अधिकारिकम् इतिवृत्तम् । माधवस्य सुहृदः मकरन्दस्य सम्बन्धि इतिवृत्तं तु प्रासङ्गिकमितिवृत्तम् ।

प्रस्तुते मालतीमाधवाख्ये प्रकरणे दशाङ्काः विद्यन्ते ।

पद्मावतीपुरस्थः अमात्यवर्यः भूरिवसुः । तदीयतनुजा मालती प्रकृतप्रकरणस्य कथानायिका । मदनोत्सवे इदं प्रथमतया मालतीमाधवं समुद्वीक्ष्य तस्मिन् अनुरक्ता भवति । माधवोऽपि मालत्याम् अनुरक्तः भवति । इत्थं परस्परम् अनुरक्तौ तरुणौ मालती-माधवौ मेलितुं प्रयतेते । परं विधिस्तु आनुकूल्यतां न भजते । कामन्दकीनाम्नी बौद्धसन्यासिनी अनयोः मालतीमाधवयोः

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :10.16(2026); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:15, Issue:1(3), January 2026
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

पाणिग्रहणं सम्पादयितुं बहुधा यतते ।

अन्यस्मिन् पार्श्वे भूरिवसुः नन्दननामकं युवानं स्वपुत्र्याः मालत्याः वरत्वेन निश्चिनोति । परमशिवस्य मन्दिरस्य समीपे विद्यमाने अशोकवने मालती – माधवयोः मेलनाय कामन्दकी वेदिकां समायोजयति । माधवास्तु मालत्याः आगमनात् प्रागेव तत्र समागत्य क्वापि आत्मानं गोपायते स्म । अत्रान्तरे मालती स्वसख्या मदयन्तिकया सह तत्र समायाति । मालती-माधवयोः मेलनात् प्राक् कश्चन सिंहः स्वसंरक्षणपेटिकातः बहिरागतः । तेन सर्वेऽपि इतस्ततः भीत्या धावन्तः पलायन्ते । तदानीं कश्चन कोलाहलः संवृत्तः । मकरन्दः तत्रागत्य कथञ्चित् सिंहं निहत्य मूर्च्छां प्राप्तः । मकरन्दः किञ्चित् समयानन्तरं मूर्च्छावस्थातः स्वस्थतां प्राप्य मालत्याः सुन्दर सखीं मदयन्तिकां प्रेक्ष्य तस्यामासक्तो भवति । अत्रान्तरे अघोरघान्टाख्यः कापालिकः करालदेव्यैः बलिं प्रदातुं बलात् मालतीं नयति । भीता मालती उच्चैः आक्रन्दति । तत्समीपे विद्यमानः माधवः तत्र समागत्य अघोरघण्टं हन्ति ;मालतीञ्च रक्षति । स्वगुरुम् अघोरघन्टं माधवः मारितवान् इतिहातोः तदीया शिष्या कपालकुण्डलाख्या कापालकी माधवस्योपरि प्रतिशोधं स्वीकर्तुमुपायमालोचयति ।

कामन्दकी तावत् मकरन्दं मालतीवेषेण सम्यगलंकृत्य भूरिवसोः गेहं प्रेषयति । तत्र नन्दनेन सह पाणिग्रहणं सुसम्पन्नम् । वधूवेषेण विद्यमानः मकरन्दः नन्दनं बहुधा ताडयति । तत्ताडनेन पितरां कुपितः नन्दनः ततः निर्गच्छति । तदा भ्रातृजायां सान्त्वयितुं मकरन्दिका तत्रास्याति । मालतीवेषेण दृश्यमानास्तु मकरन्द एवेति ज्ञात्वा मकरन्दिका सन्तुष्यति । मदयन्तिकां बलादपहृतवान् इत्यपराधात् मकरन्दं राजभटाः बध्नन्ति । स्वसुहृदं मकरन्दं रक्षितुं माधवः मालती उध्याने विसृज्य ततः निर्गच्छति । उद्याने मालती एकाकिनी तिष्ठति । अवकाशोऽयं साधुरूपेण उपयोक्तव्यः इति निश्चित्य कपालकुण्डली मालतीं बलात् श्रीपर्वतं प्रति नयति । माधव –मकरन्दौ राजभटैः सह घोरं युद्यमानावास्ताम् । तयोः शौर्य – पराक्रमादिकैः प्रीतः राजा तौ राजभटेभ्यः मोचयति । तत्समये कामन्दकी स्वबुद्धिबलात् मालतीं रक्षति । नायिका –नायकयोः मालती – माधवयोः समागमेन , मदयन्तिका मकरन्दयोः पाणिग्रहणेन च प्रकरणमेतत् सुखान्ततया परिणमति । इह नायकस्य माधवस्य सम्बन्धि वस्तु आधिकारिकमिति ,माधवस्य सुहृदः मकरन्दस्य सम्बन्धि वस्तु प्रासङ्गिकमिति च परिगण्यते । एवम् उभेऽपि इतिवृत्ते परस्परम् आश्रिते सहृदयरञ्जने भवतः ।

वस्तुनः निरूपणात् परं नेतृविषयिकी चर्चा आरभ्यते -

" भेदैश्चतुर्धा ललितशान्तोदात्तोद्धतैरयम् । "

इति नायिकाश्चतुर्विधः ,धीरललितः ,धीरशान्तः ,धीरोधात्तः धीरोद्धतश्चेति ।

प्रकरणाख्ये रूपकविशेषे नायकः धीरशान्तः भवति । तल्लक्षणं च -

" सामान्यगुणयुक्तस्तु धीरशान्तः द्विजादिकः । " इति ।

विनयादिनेतृसामान्यगुणयोगी धीरशान्तः । द्विजादिक इति विप्र- वणिक् – सचिवादीनां प्रकरण नेतृणाम् उपलक्षणम् । विवक्षितं चैतत् । तेन नैश्चिन्त्यादिगुणसंभवेऽपि विप्रादीनां शान्तदैव ,न लालित्यम् । यथा – मालतीमाधवे माधवः । इति दशरूपकगतैः वृत्तिवाक्यै माधवः धीरशान्तः नायक इति निर्णीतः । उक्तञ्च तत्रैव -

तत उदयगिरेरिवैक एव स्फुरितगुणद्युतिसुन्दरः कलावान् ।
इह जगति महोत्सवस्य हेतुर्नयनवतामुदियाय बालचन्द्रः ॥ इति ।

अपि च श्रृङ्गारावस्थाभिः नायकस्य पुनश्चातुर्विध्यं प्रदर्शितम् । यथा -

Cover Page
INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :10.16(2026); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:15, Issue:1(3), January 2026
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

" स दक्षिणः शठो धृष्टः पूर्वां प्रत्यन्यया हृतः ।" इति ।
एतद्विभागानुसारं माधवे अनुकूलनायक लक्षणं सङ्गच्छते । तदुक्तम् । -
" अनुकूलस्त्वेकनायिकः । "
इति अनुकूलनायकस्य लक्षणं प्रोक्तम् ।
प्रकरणस्यादितः अन्तः यावत् मालती-माधवौ
परस्परम् अनुरक्तौ दृश्यते इत्यतः माधवः अनुकूलः नायकः नायकः ।
इह मालतीं विना माधवः नान्यां तरुणीं प्रेक्षते इत्यतः अनुकूलः नायकः ।
दशरूपके तु नायक भेद – प्रभेदनिर्देशात् परं तत्सहायाः निर्दिष्टाः ।
" सहायानाह -
पताकनायकस्त्वन्यः पीठमर्दो विचक्षणः ।
तस्यैवानुचरो भक्तः किञ्चिदूनश्च तद्गुणैः ॥
प्रागुक्तप्रासङ्गिकेतिवृत्तविशेषः पताका । तन्नायकः पीठमर्दः प्रधानेतिवृत्तनायकस्य सहायः ।
यथा मालतीमाधवे मकरन्दः ।" इति ।
उपरिनिर्दिष्टकारिकानुसारं ,वृत्तिवाक्यैश्च मालतीमाधवप्रकरणे नायकस्य माधवस्य प्रियसखः
मकरन्दः पीठमर्दस्थानीयः भवति इति निर्धारितः ।
वस्तु – नेता –रसस्तेषां भेदकः । इति कारिकाभागेन निर्दिष्टनेतृपदेन नायकेन सार्धं नायिका
चोपादेयतामुपयाति । रूपके नायकपात्रेण सह नायिकायाः प्राधान्यम् अपहार्यमास्ते ।
संस्कृतलाक्षणिकशिरोमणिभिः " नायकसामान्यगुणयोगिनी नायिका " इति समुदीरिता ।
नायकस्य सामान्यलक्षणानि यथा -
" नेता विनीतो मधुरस्त्यागी दक्षः प्रियंवदः ।
रक्तलोकः शुचिर्वाग्मी रूढवंशः स्थिरोयुवा ॥
बुद्ध्युत्साहस्मृतिप्रज्ञाकलामानसमन्वितः ।
शूरो दृढश्च तेजस्वी शास्त्रचक्षुश्च धार्मिकः ॥" इति ।
उपरि निर्दिष्टनायकलक्षणांशाः सर्वेऽपि नायिकायां च समन्विताः दृश्यन्ते ।
प्रकरणगतनायिकाविषये -
" नायिका तु द्विधा नेतुः कुलस्त्री गणिका तथा ।
क्वचिदेकैव कुलजा , वेश्या क्वापि , द्वयं क्वचित् ॥"
कुलजाऽभ्यन्तरा ,बाह्या वेश्या ,नातिक्रमोऽनयः ।
आभिः प्रकरणं त्रेधा ,सङ्कीर्णं धूर्तसङ्कुलम् ॥"
इति दशरूपककारेण निर्दिश्यते ।
आदौ नायिकाभेदाः -
" स्वान्या साधारणस्त्रीति तद्गुना नायिका त्रिधा ।"
इत्यत्र नायिकायास्त्रैविध्यं प्रदर्शितम् । यथा
स्वकीया नायिका ,परकीया नायिका,साधारण नायिकेति ।

प्रस्तुते मालतीमाधवाख्ये प्रकरणे नायके माधवे अनुरक्ता मालती तावत् परकीयानायिकागणे
अन्तर्भवति ।दशरूपके नायिकाभेदप्रभेदपरिगणनावसरे अन्यस्त्रीविषये एवं निर्दिश्यते
अथान्यस्त्री -
" अन्यस्त्री कन्यकोढा च नान्योढाङ्गिरसो क्वचित् ।

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :10.16(2026); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:15, Issue:1(3), January 2026
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

कन्यानुरागमिच्छातः कुर्यादङ्गाङ्गिसंश्रयम् ll " इति l

इदानीं मालतीमाधवप्रकरणगता नायिका मालती तु परकीया कन्यकाभेदेऽन्तर्भवति l कन्यका तु पित्राद्यायत्वात् अपरिणीतापि अन्यस्त्रीति परिगण्यते l

" आदौ वाच्यः स्त्रिया रागः पुंसः पश्चात्तदिङ्गितैः l"

इत्यालङ्कारिकानुसारं मालतीमाधवप्रकरणगते प्रथमाङ्के एव नायकविषयकः नायिकानुरागः समुपवर्णितः l " वस्तु – नेता – रसस्तेषा भेदकः l "

इति दशरूपकसिद्धान्ते तृतीयः अर्थात् अन्तिमः अंशस्तु रसविचारः तत्रापि अङ्गिरसविचारः l प्रकरणाख्ये रूपकविशेषे अङ्गिस्थानीयौ रसौ द्वावेवा तदुक्तम् -

" एको रसोऽङ्गी कर्तव्यो वीरः शृङ्गार एव व वा l
अङ्गमन्ये रसाः सर्वे कुर्यान्निर्वहणेऽद्भुतम् ll " इति l

रूपकभेदेषु आदिमे भेदे अर्थात् नाटके शृङ्गारः अथवा वीरः अङ्गिरसत्वेन निबन्धनीयः इति आलङ्कारिकनियमः l स एव नियमः प्रकरणेऽपि अनुवर्तते l

प्रस्तुते मालती – माधवाख्ये प्रकरणे शृङ्गाररसः अङ्गिरसत्वेन समुपनिबद्धः l श्रुङ्गाररसस्य भेद – प्रभेदविषये मम्मटाचार्यस्य मतं प्रामाणिकमिति परिगण्यते आलङ्कारिकैः ,व्याख्यतृभिश्च l

" तत्र शृङ्गारस्य द्वौ भेदौ सम्भोगो , विप्रलम्भश्च l तत्राद्यः परस्परावलोकनालिङ्गनाधरपानपरिचम्बुनाद्यन्तत्वादपरिच्छेद्य एक एव गण्यते l अपरस्तु अभिलाषविरहेर्ष्याप्रवासशापहेतुक इति पञ्चविधः l " इति l

प्रकृते मालती- माधवप्रकरणे अभिलाषहेतुकः विप्रलम्बश्रुङ्गारः भवभूतिमहाकविना अङ्गिरसत्वेन समुपनिबद्धः l तत्र दिङ्मात्रम् उदाहरणम् -

" प्रेमार्द्राः प्रणयस्पृशः परिचयादुद्गाढरागोदया
स्तास्ता मुग्धदृशो निसर्गमधुराश्चेष्टा भवेयुर्मयि ,
यास्वन्तः करणस्य बाह्यकरणव्यापाररोधी क्षणा
दाशंसापरिकल्पितास्वपि भवत्यानन्दसान्द्रो लयः ll इति l

इह ' अभिलाषः ' इत्यक्तौ इदं प्रथमतया प्रादुर्भूतः अनुरागविशेषः l उपरि निर्दिष्टे पद्यविशेषे नायिकायाः मालत्याः समागमं प्राप्तुं नायकस्य माधवस्य अभिलाषविशेषः सम्यक्तयाभिव्यज्यते इत्यतः अभिलाषहेतुकः विप्रलम्भश्रुङ्गारः l अत्र मालती आलम्बनविभावस्थानीया समुल्लसति l मालत्याः विलासानां स्मरणम् उद्दीपनविभावः l अभिलाषस्थाविष्करणम् अनुभावः l नायकस्य माधवस्य उत्कण्ठा संचारिभावः l रतिः शृङ्गाररसस्य स्थायिभावः l

उपयुक्त ग्रन्थसूचि -

भरतः – नाट्यशास्त्रम्
भवभूतिः – मालतीमाधवम्
धनञ्जयः – दशरूपकम्